# Sahasrara Stutih

# सहस्रारस्तुतिः

## Document Information

Text title : Sahasrara Stuti

File name : sahasrArastutiH.itx

Category : vishhnu, vAdirAja, vishnu, stuti

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Meenakshi Premanand

Latest update : June 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2024

*sanskritdocuments.org*

# सहस्रारस्तुतिः

सहस्रार महाशूर रणधीर गिरा स्तुतिम् ।
षट्कोण रिपुहृद्बाण सन्त्राण करवाणि ते ॥ १॥

यस्त्वक्तस्तप्तसुतनुः सोऽस्ति मुक्तिफलं किल ।
नातप्ततनुरित्यस्तौत् ख्याता वाक् त्वां महौजस ॥ २॥

हतवक्रद्विषच्चक्र हरिचक्र नमोऽस्तु ते ।
प्रकृतिघ्नासतां विघ्न त्वमभग्नपराक्रम ॥ ३॥

कराग्रे भ्रमणं विष्णोर्यदा ते चक्र जायते ।
तदा द्विधाऽपि भ्रमणं दृश्यतेऽन्तर्बहिर्द्विषाम् ॥ ४॥

वरादवध्यदैत्यौघशिरःखण्डनचातुरी ।
हरेरायुध ते दृष्टा न दृष्टा या हरायुधे ॥ ५॥

अवार्यवीर्यस्य हरेः कार्येषु त्वं धुरन्धरः ।
असाध्यसाधको राट् ते त्वं चासाध्यस्य साधकः ॥ ६॥

ये छिन्नकन्धराश्चक्र दैतेयास्तव धारया ।
त एव चित्रमनयंस्तथाऽप्यच्छिन्नकन्धराम् ॥ ७॥

अरे तवाग्रे नृहरेररिः कोऽपि न जीवति ।
नेमे तवाग्रे कामाद्या नेमे जीवन्त्वहो द्विषः ॥ ८॥

पवित्रपविवत्त्राहि पवित्रीकुरु चाश्रितान् ।
चरण श्रीशचरणौ स्थिरीकुरु मनस्सु नः ॥ ९॥

यस्त्वं दुर्वाससः पृष्ठनिष्ठो दृष्टोऽखिलैः सुरैः ।
अस्तावयः स्वभर्तारं स त्वं स्तावय मद्गिरा ॥ १०॥

भूस्थदुर्दर्शनं सर्वं धिक्कुरुष्व सुदर्शन ।
वायोः सुदर्शनं सर्वस्यायोध्यं कुरु ते नमः ॥ ११॥

सुष्ठ दर्शय लक्ष्मीशतत्वं सूर्यायुतप्रभ ।
द्वारं नः कुरु हर्यास्यै कृतद्वार तमस्यपि ॥ १२॥

पद्यानि निरवद्यानि वादिराजाभिधः सधीः ।
द्वादश द्वादशारस्य चक्रस्य स्तुतयेऽकृत ॥ १३॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता सहस्रारस्तुतिः सम्पूर्णा ।

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु ।

Proofread by Meenakshi Premanand

*Sahasrara Stutih*

pdf was typeset on June 8, 2024

Please send corrections to *sanskrit@cheerful.com*